National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 90-92
© 2025 NJHSR
www.sanskritarticle.com

**मोहन लाल वर्मा**
सहायकाचार्यः(अ.)
के.सं.वि.वि., एकलव्यपरिसरः,
अगरतला ।

**Correspondence:**
**मोहन लाल वर्मा**
सहायकाचार्यः(अ.)
के.सं.वि.वि., एकलव्यपरिसरः,
अगरतला ।

# साम्प्रतिके अथर्ववेदीयचिकित्सापद्धतिनाम् उपादेयता

**मोहन लाल वर्मा**

प्रकृतिरियं जागतिकप्राणीनां कृते वरदान स्वरुपा वर्त्तते।एतस्याः प्रत्येकानि तत्त्वानि यथा पृथिवीजलाग्निवायुसूर्यचंद्रादयः सर्वविधिना सर्वेषां प्राणीनां जीवनस्याधारस्वरूपा वर्त्तन्ते। अस्माकं वैदिकऋषय एतया प्रकृतित्या सार्द्धं जीवनयापनं कुर्वन्तः रोगादिनाम् उपशमनाय प्राकृतिकतत्त्वेषु विद्यमानया शक्त्या पूर्णरूपेण परिचिता आसन्। एतदर्थं रोगोपचारनिमित्तं तैर्महर्षिभिः तन्त्रमन्त्रविद्यानाम् अपि च सिद्धमणिभिः सह प्रकृत्यां सुलभौषधीनां प्रयोगः क्रियते स्म। ते महर्षयो विविधप्रकारकानां रोगानां निवारणं वनस्पतिसुलभौषधिभिः कुर्वन्ति स्म उत प्राकृतिकत्त्वैः सूर्यवायुजलद्वारा कुर्वन्ति स्म ।

अथर्ववेदस्य साक्षात् सम्बन्ध आयुर्वेदेन वर्त्तते। रुजां निवारणाय आथर्ववैदिकऋषिभिः अनेकविधचिकित्सापद्धत्तयः स्वीकृता आसन्। तासु चिकित्सासु सर्वसुलभा चिकित्सापद्धत्ति प्राकृतिकचिकित्सापद्धत्तिः वर्तते। अथर्ववेदस्य अध्ययनेन एतद् ज्ञायते यत् तदानींतन जनाः एतस्याः चिकित्सापद्धत्याः अन्तर्गतैः पृथिविजलवायुसूर्यादिभि यागादिमाध्यमेन च रूजामुपचारं कुर्वन्ति स्म। अथर्ववेदे कासाञ्चन विद्यमानानां चिकित्सापद्धतिनाम् उल्लेखोऽत्र क्रियते । तद्यथा-

**1. अग्निचिकित्सापद्धत्तिः -**

यागाग्निद्वारा कृच्चिकित्सापद्धतिः अथर्ववेदे अग्निचिकित्सा इति उच्यते। पञ्चमहाभूतचिकित्सासु अग्निचिकित्सायाः प्रमुखतमं स्थानं विद्यते। अग्निचिकित्सायामस्यां मानवशरीरस्य प्रत्येकाङ्गेभ्यो तापदानम् अग्नौ गिलोय इति गूगल इति च कीटनाशकानि द्रव्यानि संस्थाप्य यज्ञहवनकरणं तप्तप्रस्थरखण्डैः, तप्तेष्टिकाभि अपि च कैश्चित् तप्तवस्तुभिः व्याधिग्रस्ताङ्गानामुष्णीकरणञ्च भवति स्म। इत्थम् अनेकविधिना अग्निसेवनं क्रियते स्म। अग्निः सर्वेषां व्याधिनाम् औषधमस्तीति अथर्ववेदो वदति । तद्यथा-

**'अग्निष्कृणोतु भेषजम्'**।[1]

वर्तमानकाले अग्नेः सेवनम् उष्णजलरूपेण विद्युत्सञ्चालितयन्त्रमाध्यमेन च नैकेभ्यो व्याधिभ्यः मुक्तिनिमित्तं क्रियते । सर्वेऽपि वेदा यज्ञम् अग्निञ्च अतिमहत्त्वपूर्णं मन्वते ।

सर्पविषं न्यूनीकर्तुं सर्पेण दन्शितम् अंगम् अग्निना तप्तलौहेन ज्वाल्यते स्म। एवं विधिना सर्पविषं दूरीक्रियते स्म । तद्यथा -

**अग्निर्विशमहेर्निरधात् सोमो निरणयीत्।**
**द्रंष्टारमन्वगाद् विषमहिरमत्** ।।[2]

रूजुत्पन्नकारकान् विषाणून् हन्तुम् अग्नौ उत यागाग्नौ हवनं परमोपयोगिविधिः वर्त्तते तद्यथा अथर्ववेदे उक्तमस्ति -

**सर्वेषाञ्च क्रिमीणां सर्वासाञ्च क्रिमीणाम्।**
**भिनद्म्यश्मना शिरो दहाम्यग्निना मुखम्**।।[3]

एवं विधिना अग्निः अथर्ववेदे रुजुत्पन्नकारकाणां विषाणूनां नाशकरूपेण उक्तमस्ति। अधुनाऽपि रोगनिवारणार्थम् आधुनिकचिकित्सालयेषु विभिन्नरूपेण अग्निप्रयोगाः क्रियन्ते।

एते प्रयोगा: मानवस्वास्थ्यनिमित्तम् अति लाभकारिणस्सन्ति इति।

**2. जलचिकित्सापद्धत्ति: -**

अथर्ववेदीयचिकित्सापद्धत्तौ महत्त्वपूर्णस्थानं भजते जलचिकित्सा-पद्धतिरियम्। अथर्ववेदे जलाधिष्ठातृदेवतारूपेण रुद्रं वरुणं च स्वीक्रियेते। एतावेव देवौ जलचिकित्सापद्धते: आविष्कारकौ स्वामीनौ उत मन्येते। एतदर्थमेव रुद्र: दिव्यभिषक्[4] वरुणो वैद्यस्वामी चिकित्सकश्च उक्तोऽस्ति[5]। एषा जलचिकित्सापद्धत्ति: जलभेष-जनाम्नापि ज्ञायते। एवमपि मन्यते यद् रुद्र: रूपाविष्कारक एतच्चिकित्सापद्धत्ते: विशेषज्ञश्च अस्ति। जलचिकित्सापद्धत्तिरपि अनेकेषां रोगाणां निवारिका एका उत्तमा पद्धति: वर्तते यया शीतोष्णजलप्रयोगेण शरीरस्य बाह्यान्तररूज: दूरीक्रियन्ते। जलं सर्वासु औषधीसु उत्तमा औषधि: वर्त्तते या शरीराय पुष्टिप्रदानं करोति।इदं हृद्रूजामपि औषधं वर्त्तते। अथर्ववेदीयऋषयो अनेकविधिना जलस्य गुणगानमकुर्वन्। अथर्ववेदीयऋष्यनुसारेण जलं हृदयरोगविनाशकं[6] बलवर्धकं[7] सौन्दर्यवर्धकं रमणीयतावर्धकं[8] रोगनाशकञ्च अस्ति।[9] जलेऽस्मिन् सर्वासाम् औषधीनाममृतस्य च गुणा विद्यमानाः सन्ति ।[10] एतदर्थमेव अथर्वा ऋषि: जलं दिव्यौषधिरूपेण स्वीकरोति ।[11]

इत्थं जलचिकित्सापद्धतिना अनेकप्रकारका रोगा: यथा चर्मरोग उदररोग ज्वरतापादयश्च उपशाम्यन्ति। आयुर्वेदानुसारेण उषाकाले जलपानेन उदरसम्बन्धिरुज्भ्यो मुक्ति: भवति। वस्तुतः जले अग्निसोमौ(उष्णत्वं शैत्यत्त्वञ्च) विद्यमानौ भवत: यौ प्राणीषु प्राणशक्तित्वम् ओजस्विताञ्च प्रदानं कुरुतः[12]। प्रातःकाले शीतजल-स्नानेन शरीरं स्वस्थ्यं रोगरहितञ्च भवति। चिकित्सापद्धतिरियम् एका अद्भुतचिकित्सापद्धति: वर्त्तते या वैदिकऋषिभि: प्रयुक्ता आसीत् अधुनाऽपि प्रयुज्यते । तथैव लाभकारिणी अपि वर्त्तते ।

**4. सौरचिकित्सापद्धत्ति: -**

वैदिकसौरचिकित्सापद्धति: मानवानाम् आरोग्याय अति उपयोगिनी वर्त्तते। सूर्यविषये ऋग्वेदो वदति यत् "एष: सूर्य: सम्पूर्णजगत: आत्मा वर्तते"।[13] प्रश्नोपनिषदपि सूर्यमहात्म्यं गायन् वदति यत् "सूर्य समस्तमानवजगत: प्राणो अस्ति।[14] अथर्ववेदो अपि वदति यत् "सूर्यरश्मय: शरीरसुखप्रदात्र्य: सन्ति" इति[15]। मानवस्वास्थ्यनिमित्तं एतासां सूर्यरश्मिणां सेवनम् अत्यावश्यकं वर्त्तते। अथर्ववैदिकऋषि: ब्रह्मानुसारेण सूर्यात् सम्बन्धविच्छेद: कदापि न करणीय:।[16] सूर्यरश्मिषु वासोऽमृतादपि महत्त्वपूर्णस्थाने वास इव वर्त्तते एतया सूर्यरश्मिणा मानव: दीर्घायुत्वं प्राप्नोति ।[17] अथर्ववेदानुसारेण सूर्यरश्मयो अनेकेषां रूजां नष्टकारिका: सन्ति। भृग्वङ्गिरा स्वदृष्टे एकस्मिन् संपूर्णसूक्ते (८.९) ज्ञापयति यत् सूर्यरश्मिभि: शिरोवेदनाया अक्षिनासिकाकर्णवेदनानां सर्वविधज्व-राणां हृदयोदरादिरूजाम् उपचार: कर्तुं शक्यते।[18] सूर्यरश्मिनाम् उपयोग: मानवै: स्वशरीरवर्णानुसारेण आयु-अनुसारेण च करणीय:। सूर्यरश्मीणां सम्मुखं उपविश्य अपि रूजां निवारणं क्रियते। प्रातःकाले सन्ध्या काले च सूर्यसम्मुखं उपविश्य कृतसन्ध्यावन्दनादिकस्यापि प्रभाव: मानवशरीरेषु प्रभवति। वर्तमानकालेऽपि जनै आधुनिक-यन्त्रमाध्यमेन उष्णरश्मिनिक्षेपकयन्त्रद्वारा ('लेज़रलाईट'इति) अन्योष्णरश्मिभिश्च वेदनायुक्ताङ्गानां चिकित्सा क्रियते।

**4. वायुचिकित्सापद्धत्ति: -**

सम्पूर्णजगत: आधारोऽयं प्राणवायु वर्त्तते। यदि जलं जीवनम् अस्ति चेत् वायु: प्राणीनां प्राणो वर्त्तते। संसारेऽस्मिन् जीवननिमित्तं पञ्चमहाभूतेषु वायु तत्त्वम् अत्यावश्यकम् अङ्गं वर्त्तते। वेदेष्वपि प्राणवायोर्महत्त्वं दर्शितमस्ति। अथर्ववेदे एतद्वायु: सम्पूर्णचराचर-जगत: स्वामी अस्तीति उक्तमस्ति[19]। अपि च एतस्मिन्नेव सर्वं प्रतिष्ठितं वर्त्तते ।[20] वैदिकऋषय एतद्विजानन्ति स्म यत् शरीराणां नैरोग्यं प्राणसबलतायामेव आधारितं वर्त्तते। तस्यां दौर्बल्ये सति शरीरेषु अनेकविधा रूज: उत्पद्यन्ते[21]। मानवशरीरस्य विभिन्नाङ्गेषु विचरणार्थम् अपि च सर्वेषां कार्याणां सम्पादनाय वायु: प्राणापानसमानोदानव्यानरूपेण प्राणीनां शरीरमधितिष्ठति। शरीरसञ्चालनार्थं भगवता वेदव्यासेनापि एतान् अतिरिच्य शिवाग्निपुरानणयो: नागकूर्मक्रिकलदेवदत्तधनञ्जयेत्येतेषां पञ्चविध-वायुनां वर्णनं क्रियते। अयं दशविधात्मको वायु: शरीरीषु गतिप्रदानं करोति अपि च शरीरं दोषमुक्तं करोति। अथर्ववेदानुसारेण वायु: सर्वेषां रोगाणां हारकभेषजं आरोग्यं अपि उक्तमस्ति।[22]

अथर्ववेदे एकं संपूर्णसूक्तमेव वायुविषये उक्तं वर्त्तते। एतस्मिन् प्राणशक्त्या: प्राणायामस्य प्राणचिकित्सायाश्च गरिमा गीता वर्त्तते। सूक्तेऽस्मिन् प्राणशक्तिनमस्कारतः प्राणम् औषधरूपेण मत्वा प्राणचिकित्सया दीर्घायुजीवनारोग्यस्य च प्रमाणा: प्राप्यन्ते-

**प्राणाय नमो यस्य सर्वमिदं वशे।**
**यत्प्राण स्तनयित्नूनाभिक्रन्दत्योषधि:।।**
**अभिवृष्टा ओषधय: प्राणेन समवादिरन्।**
**आयुर्वेदेन प्रातितर: सर्वा न सुरभीरक:।।**[23]

इत्थम् ऋग्वेदानुसारेण वायुद्वारा नैरोग्यं दीर्घायुत्वं सुखीस्वस्थ्यं च जीवनं प्राप्यते। वैदिकऋषीणां दीर्घस्वस्थ्यञ्च जीवनम् आसीत् यतोहि ते एनां वायुचिकित्सां जानन्ति स्म। अधुनापि समाजे आसनप्राणायाममाध्यमेन बहल: जना वायुचिकित्सां निर्वहन्ति इति।

**मृच्चिकित्सापद्धत्ति: -**

मृदा चिकित्सा इति मृच्चिकित्सा। अस्माकं वेदे मृच्चिकित्साया नैके प्रमाणा उपलभ्यन्ते। पंचतत्वचिकित्सापद्धत्तीसु मृतचिकित्सा अपि महत्वपूर्णं स्थानं भजते।"पृथिवी माता पुत्रोऽहं पृथिव्या" इति अथर्ववेदो वदति।(24) अथर्ववेद एकस्मिन् स्थाने उल्लेख: प्राप्यते यत् वल्मिकमृद् आश्रावरूज:(रक्तस्रावरोगस्य) औषधं वर्त्तते -

**नीचै: खनन्त्यसुरा अरुस्राणमिदं महत्।**
**तदाश्रावस्य भेषजं तदु रोगमनीनशत्।।**
**अरुस्राणमिदं महत् पृथिव्या अध्युद्भृम्।**
**तदास्रावस्य भेषजं तदु रोगमनीनशत्।।**

नारायणी उपनिषदपि मृच्चिकित्सायाः विधानं करोति-

**'मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्'।।**[24]

शरीरे यत्र कुत्रापि अनुचितरक्तस्रावो यस्मात् कस्मादपि कारणात् स्यात् तस्य उपचारो वल्मिकमृदा चिकित्साकरणस्य विधानं वर्त्तते[25]। शरीरे उदीयमानेषु पिटकस्फोटकेषु अपि एतल्लेपनस्य विधान-मस्ति[26]। एतल्लेपनेन पिटकस्फोटकानाम् उपचारो भवति। एतस्मिन् मृदि नैकानि पोषकतत्त्वानि वर्तन्ते। अधुना अपि अनेकविधिना मृदां प्रयोगो मानवसौन्दर्यप्रसाधनेषु स्नानार्थं सौन्दर्य-पुष्ट्यर्थञ्च क्रियते। वर्तमानकालेऽपि ग्रामीणक्षेत्रेषु वृश्चिकदन्शनिवारणार्थं मूषकमृत्प्र-योगो मन्त्रमाध्यमेन क्रियते। इत्थम् आधुनिक-युगेऽपि रोगाणां निवारणार्थं सौन्दर्यवर्धनार्थं दन्शनिवारणार्थञ्च मृत्प्रयोगः क्रियते।

**6. शल्यचिकित्सापद्धत्तिः -**

अथर्ववेदे बहुत्र शल्यचिकित्साविषये आख्यानानि उपलभ्यन्ते। अथर्ववेदे शल्यचिकित्सया औषधेन च त्वच्व्रणानाम् अपि च भङ्गास्थि-अङ्गानाम् उपचारः स्म इति उल्लेखः प्राप्यते । तद्यथा -

**'शं ते मांसस्य विस्रस्तं समस्थ्यपि रोहतु।**
**मज्जा मज्जया सन्धीयतां चर्मणा चर्म रोहतु ।।**
**असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु ।**
**ऋभू रथस्यैवाङ्गानि सन्दधत् परुषा परुः'।।**[27]

वेदेऽस्मिन् शल्यचिकित्सया विषनिवारणस्यापि प्रसङ्गः प्राप्यते -

**अपस्कम्भस्य शल्यान् निरवोचमहं विषम्।**
**शल्याद् विषं निरवोचं प्राञ्जनादुत पर्णधेः।।**[28]

एवं शल्यचिकित्सया विषहरणमपि क्रियते स्म।

सम्पूर्णाथर्ववेदे अनेकविधचिकित्सापद्धत्तीनां स्वरूपं वर्णितमस्ति। एता चिकित्सापद्धत्तयो मानवान् स्वस्थ्यान् कर्तुं पूर्णरूपेण समर्थवत्यः सन्ति इति। तदानींतन वैद्याः प्रकृतिसुलभसाधनै अनेकविधरोगाणाम् उपचारं

कुर्वन्ति स्म अपि च जनाः स्वस्थ्यजीवनं जीवन्ति स्म। अथर्ववेदीया इमाः चिकित्सापद्धत्तय एव कालान्तरे विकासं प्राप्तवत्यः। अधुना अपि चिकित्साक्षेत्रेषु मानवरोगाणां निवारणाय शल्यं कर्तुञ्च एतासां पद्धत्तीनां महती भूमिका वर्त्तते ।

**सहायकग्रन्थसूची**


1. अथर्ववेदसंहिता - पं. श्रीराम शर्मा आचार्य, ब्रह्मचस् प्रकाशन, शान्तिकुञ्ज, हरिद्वार - 2002.
2. ऋग्वेदसंहिता- प्रो. उमाशङ्कर शर्मा ऋषि, चौखम्बा विद्याभवन, वाराणसी ।
3. प्रश्नोपनिषद् - गीताप्रेस, गोरखपुर ।
4. नारायणोपनिषद् - डा. जमुपनापाठकः, चौखम्बा संस्कृत सीरीज आफिस ।
5. यजुर्वेद संहिता - वेदमूर्ति तपोनिष्ठ पं. श्रीराम शर्मा आचार्य, भगवती आध्यात्मिक सेवा केन्द्र - 2014.
6. वैदिकसाहित्य का इतिहास - डा. पारसनाथ द्विवेदी, चौखम्बा सुरभारती प्रकाशन - 2011-12.


**सन्दर्भग्रन्थाः**

[1]अथर्वेदसंहिता- 6/106/3 .
[2]अथर्वेदसंहिता- 10/4/26 .
[3]तत्रैव - 5/23/13.
[4]'प्रथमादैवो भिषक्'- यजु.- 16/5.
[5]'वरुणो भिषजां पतिम्'- यजु.- 11/4.
[6]'आपो.....हृदो भिषजम्'।। अथर्व.- 6/24/1.
[7]'आपो हिष्ठामयो भुवस्ता न उजै दधातन्'। अथर्व.- 1/5/1.
[8]थर्व.- 1/5/1.
[9]तत्रैव - 1/6/1, 3/1.
[10]अप्स्वन्तरमृतमप्सु भेषजम्' । अथर्व.- 1/4/4.
[11]'आपो अग्रं दिव्या ओषधयः'। अथर्व.- 8/7/3.
[12]अथर्व०- 3/13/5.
[13]'सूर्य आत्मा जगतस्तस्थुषश्च'। ऋग्वेद- 1/115/2.
[14]'प्राणः प्रजानामुदेत्येष सूर्यः'। प्रश्नोपनिषद्- 1/6.
[15]'सूर्यस्ते तन्वे शं तपति त्वां मृत्युर्दपतां भा प्रमेष्ठा'। अथर्व० 8/1/5.
[16]'मच्छित्त्वा अस्माल्लोकादग्नेः सूर्यस्य संदृशः'।अथर्व० 8/9/4
[17]अथर्व०- 8/1/1.
[18]तत्रैव - 1/8/1/1-22.
[19]'प्राणो सर्वस्येश्वरोयच्च प्राणतियच्चन्'। अथर्व०-11/10/10
[20]'प्रणाम नमो यस्य सर्वमिदं वशे यो भूतःसर्वस्येश्वरो यस्मिन् सर्वं प्रतिष्ठितम्'। 'प्राणे ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम्'।। अथर्व०- 11/4/1.
[21]अथर्ववेद संहिता -11/4/11.
[22]तत्रैव - 4/13/2.4.
[23]तत्रैव - 11/4/1.3.5.
[24]नारायणोपनिषद्- 1.8.
[25]अथर्ववेद संहिता-3/9/1.
[26]तत्रैव - 2/3/3.5.
[27]तत्रैव - 4/12/1.7,3.4.
[28]तत्रैव - 4/6/4.5.